# ॥ वाल्मीकि रामायण ॥

## ३ अरण्यकाण्ड

### अध्याय ३६

कदा चिदप्यहं वीर्यात्पर्यटन्पृथिवीमिमाम् ।
बलं नागसहस्रस्य धारयन्पर्वतोपमः ॥ १ ॥

नीलजीमूतसङ्काशस्तप्तकाञ्चनकुण्डलः ।
भयं लोकस्य जनयन्किरीटी परिघायुधः ।
व्यचरं दण्डकारण्यमृषिमांसानि भक्षयन् ॥ २ ॥

विश्वामित्रोऽथ धर्मात्मा मद्वित्रस्तो महामुनिः ।
स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत् ॥ ३ ॥

अयं रक्षतु मां रामः पर्वकाले समाहितः ।
मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर ॥ ४ ॥

इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा ।
प्रत्युवाच महाभागं विश्वामित्रं महामुनिम् ॥ ५ ॥

ऊन षोडश वर्षोऽयमकृतास्त्रश्च राघवः ।
कामं तु मम यत्सैन्यं मया सह गमिष्यति ।
बधिष्यामि मुनिश्रेष्ठ शत्रुं तव यथेप्सितम् ॥ ६ ॥

इत्येवमुक्तः स मुनी राजानं पुनरब्रवीत् ।
रामान्नान्यद्बलं लोके पर्याप्तं तस्य रक्षसः ॥ ७ ॥

बालोऽप्येष महातेजाः समर्थस्तस्य निग्रहे ।
गमिष्ये राममादाय स्वस्ति तेऽस्तु परन्तपः ॥ ८ ॥

इत्येवमुक्त्वा स मुनिस्तमादाय नृपात्मजम् ।
जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमम् ॥ ९ ॥

तं तदा दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितम् ।
बभूवावस्थितो रामश्चित्रं विस्फारयन्धनुः ॥ १० ॥

अजातव्यञ्जनः श्रीमान्बालः श्यामः शुभेक्षणः ।
एकवस्त्रधरो धन्वी शिखी कनकमालया ॥ ११ ॥

शोभयन्दण्डकारण्यं दीप्तेन स्वेन तेजसा ।
अदृश्यत तदा रामो बालचन्द्र इवोदितः ॥ १२ ॥

ततोऽहं मेघसङ्काशस्तप्तकाञ्चनकुण्डलः ।
बली दत्तवरो दर्पादाजगाम तदाश्रमम् ॥ १३ ॥

तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः ।
मां तु दृष्ट्वा धनुः सज्यमसम्भ्रान्तश्चकार ह ॥ १४ ॥

अवजानन्नहं मोहाद्बालोऽयमिति राघवम् ।
विश्वामित्रस्य तां वेदिमध्यधावं कृतत्वरः ॥ १५ ॥

तेन मुक्तस्ततो बाणः शितः शत्रुनिबर्हणः ।
तेनाहं ताडितः क्षिप्तः समुद्रे शतयोजने ॥ १६ ॥

रामस्य शरवेगेन निरस्तो भ्रान्तचेतनः ।
पातितोऽहं तदा तेन गम्भीरे सागराम्भसि ।
प्राप्य संज्ञां चिरात्तात लङ्कां प्रति गतः पुरीम् ॥ १७ ॥

एवमस्मि तदा मुक्तः सहायास्ते निपातिताः ।
अकृतास्त्रेण रामेण बालेनाक्लिष्टकर्मणा ॥ १८ ॥

तन्मया वार्यमाणस्त्वं यदि रामेण विग्रहम् ।
करिष्यस्यापदं घोरां क्षिप्रं प्राप्य नशिष्यसि ॥ १९ ॥

क्रीडा रतिविधिज्ञानां समाजोत्सवशालिनाम् ।
रक्षसां चैव सन्तापमनर्थं चाहरिष्यसि ॥ २० ॥

हर्म्यप्रासादसम्बाधां नानारत्नविभूउ सिताम् ।
द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते ॥ २१ ॥

अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात् ।
परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ २२ ॥

दिव्यचन्दनदिग्धाङ्गान्दिव्याभरणभूषितान् ।
द्रक्ष्यस्यभिहतान्भूमौ तव दोषात्तु राक्षसान् ॥ २३ ॥

हृतदारान्सदारांश्च दशविद्रवतो दिशः ।
हतशेषानशरणान्द्रक्ष्यसि त्वं निशाचरान् ॥ २४ ॥

शरजालपरिक्षिप्तामग्निज्वालासमावृताम् ।

प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वमसंशयम् ॥ २५ ॥

प्रमदानां सहस्राणि तव राजन्परिग्रहः ।
भव स्वदारनिरतः स्वकुलं रक्षराक्षस ॥ २६ ॥

मानं वृद्धिं च राज्यं च जीवितं चेष्टमिआत्मन् ।
यदीच्छसि चिरं भोक्तुं मा कृथा राम विप्रियम् ॥ २७ ॥

निवार्यमाणः सुहृदा मया भृशं
प्रसह्य सीतां यदि धर्षयिष्यसि ।
गमिष्यसि क्षीणबलः सबान्धवो
यमक्षयं रामशरात्तजीवितः ॥ २८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com